आनूपास्तेषु विज्ञेयाः श्लेष्मला वातकोपनाः" ॥
इति हारीते प्रथमेऽस्थाने ११ अध्यायः ॥)

कुमुदबान्धवः, पुं, (कुमुदस्य बान्धवः ।) चन्द्रः । कर्पूरः । इत्यमरः । १ । ३ । १३ ॥

कुमुदवती, स्त्री, (कुमुदानि सन्त्यस्यां इति । मतुप् मस्य वः ङीप् ।) कुमुद्वती । कुमुदसमूहः । इत्यमरटीकायां भरतः ॥

कुमुदा, स्त्री, (कुत्सितं मोदते । कु + मुद + कः । टाप् च ।) कुम्भिका । पाना इति भाषा । गम्भारीवृक्षः । इति मेदिनीकरहेमचन्द्रौ ॥
(अस्याः पर्य्याया यथा,—
"श्रीपर्णी काश्मरी भद्रा गाम्भारी गोपभद्रिका ।
कुमुदा च सदा भद्रा कट्फला क्षुद्रगन्धिका" ॥
इति वैद्यकरत्नमालायाम् ॥) प्रायपर्णीवृक्षः । धातकीवृक्षः । कट्फलः । इति राजनिर्घण्टः ॥

कुमुदावासः, पुं, (कुमुदानां आवासः । कुमुदानि आवसन्त्यत्र वा । आ + वस् + अधिकरणे घञ् ।) कुमुदप्रायदेशः । इति हेमचन्द्रः ॥

कुमुदिका, स्त्री, (कौ भूमौ मोदते इति । मुद + कर्त्तरि ण्वुल् टाप् अत इत्वञ्च ।) कट्फलः । इत्यमरः । २ । ४ । ४० ॥ (अस्याः पर्य्याया यथा,—
"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणाश्चास्य कट्फलशब्दे ज्ञेयाः ॥)

कुमुदिनी, स्त्री, (कुमुदानि सन्त्यस्याम् । कुमुद + इनिः ङीप् ।) कुमुदयुक्तपुष्करिण्यादिः । कुमुदसमूहः । कुमुदलता । इति भरतः ॥
(यथा भ्रमराष्टके । ७ ।
"अलिरसौ नलिनीवनवल्लभः
कुमुदिनी कुलकेलिकलारसः ।
विधिवशेन विदेशमुपागतः
कुटजपुष्परसं बहु मन्यते" ॥)
तत्पर्य्यायः । कुमुद्वती २ । इत्यमरः । १ । १० । ३९ ॥ उत्पलिनी । इति राजनिर्घण्टः ॥ छोट सुँदि इति भाषा ॥

कुमुदिनीपतिः, पुं, (कुमुदिन्याः पतिः वल्लभः ।) चन्द्रः । इति हेमचन्द्रः ॥

कुमुदी, स्त्री, (कुमुद + स्त्रियां ङीष् ।) कट्फलः । इति शब्दरत्नावली ॥
(अस्या गुणादयः कट्फलशब्दे ज्ञातव्याः ॥)

कुमुदेशः, पुं, (कुमुदानां ईशः ।) चन्द्रः । इति शब्दरत्नावली ॥

कुमुद्वती, स्त्री, (कुमुद + "कुमुदनड़वेतसेभ्यो ड्मतुप्" । ४ । २ । ८७ । इति ड्मतुप् "मादुपधायाश्च" । ८ । २ । ९ । इति मस्य वः । उगितश्चेति ङीप् ।) कुमुदिनी । इत्यमरः । १ । १० । ३८ ॥
(यथा, भट्टिकाव्ये । २ । ६ ।
"प्रभातवाताहतिकम्पिताकृतिः
कुमुद्वतीरेणुपिशङ्गविग्रहम् ।
निरास भृङ्गं कुपितेव पद्मिनी
न मानिनीसंसहतेऽन्यसङ्गमम्" ॥
अस्याः पर्य्याया यथा,—
"कुमुद्वती कैरविका तथा कुमुदिनीति च" ।
गुणाश्चास्या कुमुदिनीशब्दे ज्ञेयाः । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
कुमुदाख्यनागराजस्य यवीयसी स्वसा सा तु रामचन्द्रपुत्रस्य कुशस्य पत्नी ।
यथा, रघुः १७ । ६ ।
"तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती ।
अन्वगात् कुमुदानन्दं शशाङ्कमिव कौमुदी" ॥
क्रौञ्चद्वीपान्तर्गतानां सप्तनदीनामेका नदी ।
यथा, विष्णुपुराणे २ । ४ । ५५ ।
"गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ।
क्षान्तिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः" ॥)

कुमुद्वान्, त्रि, (कुमुद + "कुमुदनड़वेतसेभ्यः" । ४ । २ । ८७ । इति ड्मतुप् मस्य वः ।) कुमुदबहुलदेशः । इत्यमरः । २ । १ । ९ ॥
(यथा रघुवंशे ४ । १९ ।
"हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्य्यस्ता यशसामिव" ॥)

कुमोदकः, पुं, (कुं पृथ्वीं मोदयति । कु + मुद + णिच् + ण्वुल् । पृथिव्याः भारावतारणादिलीलाकर्म्मभिः सर्व्वेषामानन्दकारकत्वात् तस्य तथात्वम् ।) विष्णुः । इति हेमचन्द्रः ॥

कुम्पः, त्रि, (कुम्पति कुम्पयति वा । कुपि वेष्टने + अच् इदित्वात् नुम् ।) वाङ्कुण्ठः । इति जटाधरः । कोपा इति भाषा ॥

कुम्बा, स्त्री, (कुबि वेष्टने + अच् टाप् च ।) सुगहनावृतिः । यज्ञशालादिदर्शनवारणाय वेष्टनम् । इत्यमरः । २ । ७ । १८ ॥ (यथा तैत्तिरीयसंहितायाम् । "तस्मिन्नुदीचीनकुम्बां शम्यां निदधाति" ॥ तथा शङ्करकविकृते अम्बाष्टके । ७ ।
"कुम्बावतीसमविडम्बा गलेन नवतुम्बाभवीणासविधा शं वाडवेयशशिबिम्बाभिरामसुखसम्बाधितस्तनभरा" ॥ इति ॥)

कुम्भं, क्ली, (कुं भूमिं उम्भति गन्धेन पूरयति । कु + उम्भ पूरणे + अच् । शकन्ध्वादित्वात् साधुः ।) गुग्गुलुः । इत्यमरः । २ । ३ । १२४ ॥ क्लिवत् । इति हेमचन्द्रः ॥

कुम्भः, पुं, (कुं भूमिं उम्भति जलेन । उम्भ + अच् । शकन्ध्वादित्वात् साधुः ।) घटः । अस्य परिमाणं कलसशब्दे द्रष्टव्यम् ॥ गजकुम्भः । हस्तिशिरसः पिण्डद्वयम् । इत्यमरः । ३ । ३ । १३४ ॥
(यथा प्रसन्नराघवे,—"तैः किं मत्तकरीन्द्रकुम्भकुहरेनारोपणीयाः कराः" ॥) कुम्भकर्णपुत्रः ।
(यथा, रामायणे । ५ । ७९ । १५ ।
"सुतोऽथ कुम्भकर्णस्य कुम्भः परमकोपनः ।
अब्रवीत् परमक्रुद्धो रावणं लोकरावणम्" ॥)
वेश्यापतिः । इति विश्वमेदिन्यौ ॥ समाधिविशेषः । प्राणायामाङ्गकुम्भक इति यावत् । इति धरणी ॥
(प्रह्लादपुत्रः । यथा महाभारते १ । ६५ । १९ ।
"प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत ।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत ।" ॥
विष्णुः । यथा महाभारते १३ । १४९ । ८२ ।
"अर्चिष्मानर्च्चितः कुम्भो विशुद्धात्मा विशोधनः" ॥)
द्रोणद्वयपरिमाणम् । ६४ सेर इति भाषा ।
तत्पर्य्यायः । शूर्पः २ । इति वैद्यकपरिभाषा ॥
मेषादिद्वादशराश्यन्तर्गतैकादशराशिः । तस्य पर्य्यायः । हृद्रोगः २ । इति दीपिका ॥ स च धनिष्ठाशेषार्द्धसम्पूर्णशतभिषायुक्तपूर्व्वभाद्रपदाप्रथमपादत्रयेण भवति । अस्याधिष्ठात्री देवता कलसधारी पुरुषः । स तु शीर्षोदयः । चरणरहितः । मध्यसन्तानः । मध्यमस्त्रीसङ्गः । कर्व्वूरवर्णः । वनचारी । वायुराशिः । स्निग्धः । उष्णः । अर्द्धस्वरः । वातपित्तकफप्रकृतिः । शूद्रवर्णः । पश्चिमदिक्स्वामी । ह्रस्वाङ्गः । तत्र जातफलम् ॥
"मेधावी हस्तिघोटकधनेश्वरो दन्तपीड़ायुक्तः स्नेहशून्यः" । इति ज्योतिषम् । जन्मकालीनचन्द्राश्रितैतद्राशिफलम् ।
"अलसतासहितोऽन्यसुतप्रियः
कुशलताकलितोऽतिविचक्षणः ।
कलशगामिनि शीतकरे नरः
सदसि सज्जनमानसरोधनः" ॥
इति कोष्ठीप्रदीपः ॥ तस्योदये तन्नामकलग्नं भवति । तस्य गणितप्राप्तपरिमाणं यथा । दशव्युत्क्रमाधिकः पञ्चाङ्गुलप्रभे देशे वर्त्तमानेऽगविंशायनांशे अष्टपञ्चाशत्पलाधिकत्रिदण्डाः । इति ज्योतिषम् । तत्र जातफलम् ।
"कुम्भलग्ने समुद्भूतश्चलचित्तोऽतिसौहृदः ।
परदाररतो नित्यं सत्त्वकायो महासुखी" ॥
इति कोष्ठीप्रदीपः ॥

कुम्भकः, पुं, (कुम्भ इव कायति प्रकाशते निश्चलत्वात् । कै + कः । यद्वा कुम्भ + स्वार्थे कः ।) दक्षिणहस्तेन नासापुटद्वयं धृत्वा प्राणायामाङ्गं वायुस्तम्भनम् । इति तन्त्रम् ॥ (पातञ्जलयाज्ञवल्क्यादौ तु ।
"कुम्भकः पूरको रेचः प्राणायामस्त्रिलक्षणः ।
पूरकं पूरणं वायोः कुम्भकः स्थापनं क्वचित् ॥
बहिर्निःसारणं तस्य रेचकः परिकीर्त्तितः ॥
दक्षिणे रेचयेद् वायुं वामेन पूरितोदरः ।
कुम्भेन धारयेन्नित्यं प्राणायामं विदुर्बुधाः ॥
अङ्गुष्ठेन पुटं ग्राह्यं नासया दक्षिणं पुनः ।
कनिष्ठानामिकाभ्याञ्च वामं प्राणस्य संग्रहे ॥
अङ्गुष्ठतर्जनीभ्यान्तु ऋग्वेदी सामगायनः ।
अङ्गुष्ठानामिकाभ्यान्तु ग्राह्यं सर्व्वैरपर्व्वभिः" ॥)
(तथा च, हठयोगदीपिकायाम् । २ । ४३ ।
"तत्सिद्धये विधानज्ञाश्चित्रान् कुर्व्वन्ति कुम्भकान् ।
विचित्रकुम्भकाभ्यासाद्विचित्रां सिद्धिमाप्नुयात्" ॥
"तत्सिद्धये उन्मन्यवस्थासिद्धये" । इति तट्टीका ॥ अस्य भेदाः यथा तत्रैव २ । ४४ ।
"सूर्य्यभेदनमुज्जायी सीत्कारी सीतली तथा ।
भस्त्रिकाभ्रामरीमूर्च्छा प्लाविनीत्यष्टकुम्भकाः" ॥
तथा पुनस्तत्रैव २ । ७१ ।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः ।